श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ चतुःसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःसप्ततितमः सर्गः ॥

## श्रीरामलक्ष्मणाभ्यां पम्पातटे मतङ्गवने शबर्या आश्रमं गत्वा तस्याः सत्कारस्य ग्रहणं तया सह मतङ्गवनस्य निरीक्षणं शबर्या स्वशरीरस्याहुतिं दत्त्वा ततो दिव्यधाम्नि गमनम्

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने।
आतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ॥ **3.74.1** ॥

तौ शैलेष्वाचितानेकान् क्षौद्रपुष्पफलद्रुमान्।
वीक्षन्तौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ॥ **3.74.2** ॥

कृत्वा तु शैलपृष्ठे तु तौ वासं रघुनन्दनौ।
पम्पायाः पश्चिमं तीरं राघवावुपतस्थतुः॥ **3.74.3** ॥

तौ पुष्करिण्याः पम्पायास्तीरमासाद्य पश्चिमम्।
अपश्यतां ततस्तत्र शबर्या रम्यमाश्रमम्॥ **3.74.4** ॥

तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम्।
सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः॥ **3.74.5** ॥

तौ दृष्ट्वा तु तदा सिद्धा समुत्थाय कृताञ्जलिः।
पादौ जग्राह रामस्य लक्ष्मणस्य च धीमतः॥ **3.74.6** ॥

पाद्यमाचमनीयं च सर्वं प्रादाद् यथाविधि।
तामुवाच ततो रामः श्रमणीं धर्मसंस्थिताम्॥ **3.74.7** ॥

कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः।
कच्चित्ते नियतः कोप आहारश्च तपोधने ॥ **3.74.8** ॥

कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम्।
कचित्ते गुरुशुश्रूषा सफला चारुभाषिणि ॥ **3.74.9** ॥

रामेण तापसी पृष्टा सा सिद्धा सिद्धसम्मता।
शशंस शबरी वृद्धा रामाय प्रत्यवस्थिता ॥ **3.74.10** ॥

अद्य प्राप्ता तपःसिद्धिस्तव सन्दर्शनान्मया।
अद्य मे सफलं जन्म गुरवश्च सुपूजिताः ॥ **3.74.11** ॥

अद्य मे सफलं तप्तं स्वर्गश्चैव भविष्यति।
त्वयि देववरे राम पूजिते पुरुषर्षभ ॥ **3.74.12** ॥

तवाहं चक्षुषा सौम्य पूता सौम्येन मानद।
गमिष्याम्यक्षयांल्लोकांस्त्वत्प्रसादादरिन्दम ॥ **3.74.13** ॥

चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः।
इतस्ते दिवमारूढा यानहं पर्यचारिषम् ॥ **3.74.14** ॥

तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्महर्षिभिः।
आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ **3.74.15** ॥

स ते प्रतिग्रहीतव्यः सौमित्रिसहितोऽतिथिः।
तं च दृष्ट्वा वरांल्लोकानक्षयांस्त्वं गमिष्यसि ॥ **3.74.16** ॥

एवमुक्ता महाभागैस्तदाहं पुरुषर्षभ।
मया तु सञ्चितं वन्यं विविधं पुरुषर्षभ ॥ **3.74.17** ॥

तवार्थे पुरुषव्याघ्र पम्पायास्तीरसम्भवम्।
एवमुक्तः स धर्मात्मा शबर्या शबरीमिदम् ॥ **3.74.18** ॥

राघवः प्राह विज्ञाने तां नित्यमबहिष्कृताम्।
दनोः सकाशात् तत्त्वेन प्रभावं ते महात्मनाम्॥ **3.74.19** ॥

श्रुतं प्रत्यक्षमिच्छामि सन्द्रष्टुं यदि मन्यसे।
एतत्तु वचनं श्रुत्वा रामवक्त्रविनिःसृतम्॥ **3.74.20** ॥

शबरी दर्शयामास तावुभौ तद्वनं महत्।
पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम्॥ **3.74.21** ॥

मतङ्गवनमित्येव विश्रुतं रघुनन्दन।
इह ते भावितात्मानो गुरवो मे महाद्युते।
जुहवाञ्चक्रिरे नीडं मन्त्रवन्मन्त्रपूजितम्॥ **3.74.22** ॥

इयं प्रत्यक्स्थली वेदी यत्र ते मे सुसत्कृताः।
पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः॥ **3.74.23** ॥

तेषां तपःप्रभावेण पश्याद्यापि रघूत्तम।
द्योतयन्ती दिशः सर्वाः श्रिया वेद्यतुलप्रभा॥ **3.74.24** ॥

अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः।
चिन्तितेनागतान् पश्य समेतान् सप्त सागरान्॥ **3.74.25** ॥

कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह।
अद्यापि न विशुष्यन्ति प्रदेशे रघुनन्दन॥ **3.74.26** ॥

देवकार्याणि कुर्वद्भिर्यानीमानि कृतानि वै।
पुष्पैः कुवलयैः सार्धं म्लानत्वं न तु यान्ति वै॥ **3.74.27** ॥

कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया।
तदिच्छाम्यभ्यनुज्ञाता त्यक्ष्याम्येतत् कलेवरम्॥ **3.74.28** ॥

तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम्।
मुनीनामाश्रमो येषामहं च परिचारिणी॥ **3.74.29** ॥

धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः।
प्रहर्षमतुलं लेभे आश्चर्यमिति चाब्रवीत्॥ **3.74.30** ॥

तामुवाच ततो रामः शबरीं संशितव्रताम्।
अर्चितोऽहं त्वया भद्रे गच्छ कामं यथासुखम्॥ **3.74.31** ॥

इत्येवमुक्ता जटिला चीरकृष्णाजिनाम्बरा।
अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने॥ **3.74.32** ॥

ज्वलत्पावकसङ्काशा स्वर्गमेव जगाम ह।
दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना॥ **3.74.33** ॥

दिव्याम्बरधरा तत्र बभूव प्रियदर्शना।
विराजयन्ती तं देशं विद्युत्सौदामनी यथा॥ **3.74.34** ॥

यत्र ते सुकृतात्मानो विहरन्ति महर्षयः।
तत् पुण्यं शबरी स्थानं जगामात्मसमाधिना॥ **3.74.35** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुःसप्ततितमः सर्गः॥